भारतसर्वकारीयमानवसंसाधनविकासमन्त्रालयप्रदत्तेन
वित्तीयसाहाय्येन प्रकाशितम्

# विवेकानन्दात्मकम्

[ संस्कृतखण्डकाव्यम् ]

कविरत्नम् :

डा० शम्भुनाथ आचार्यः

प्रकाशक :

विधु प्रकाशन

फर्रुखाबाद—२०९ ६२५ ( उ० प्र० )

# ❀ विवेकानन्दात्मकम् ❀

[ संस्कृतखण्डकाव्यम् ]


कविरत्नम् :

**डा० शम्भुनाथ आचार्यः**

हिन्दी विभागाध्यक्षः

बद्रीविशाल स्नातकोत्तर महाविद्यालय,

फर्रुखाबाद



प्रकाशक :

**विधु प्रकाशन**

फर्रुखाबाद—२०९ ६२५ ( उ० प्र० )

# VIVEKANANDATMAKAM

***( Sanskrit Khand Kavyam )***

By

***Dr. Shambhu Nath Acharya***

Published by :

***Vidhu Shekhar Shastri***

5/30, Chhakk Lal Street

Farrukhabad–209 625

First Edition 1989 : 1000 Copies

Copyright with the Poet

***Price.....***

Sandhya Printing Press, Bag Kuncha,

FARRUKHABAD (U. P.)

# * प्राक्कथनम् *

अयि गीर्वाणवाणीसेवापरायणधुरीणाः हृदयतमाः विद्वदपश्चिमाः !

तत्रभवतां भवतां सत्यशिरोमणीनां सहृदयकाव्यरसिकानां करकमलेषु स्वरुचितं "विवेकानन्दात्मकं खण्डकाव्यम्" एतद् उपायनीकुर्वतो ममानन्दातिरेको यः समुज्जृम्भते स चात्मभणितिषु मोदमातन्वतः कस्यचिद् कवयितुः अतिरिक्तोत्साहोर्व्रजृम्भितं भवतु नाम, किन्तु एतादृशानन्दसुधानिपानजनिता-पूर्वमुखोपलब्धिशून्यात्कवेः तु कस्यचित् काष्ठकुड्याश्मसन्निभहृदयस्यैवेति सहृददक्षानुभूतिः खलु । सत्सु परसहस्रेषु नैकविधेषु काव्यप्रबन्धेषु स्वामिविवेकानन्दवृत्तखण्डकथामाश्रित्य पल्लवितस्य, रत्नाकरजलराशिषु विन्दुवदाचरितस्य, ब्रह्मजीवयोः ईश्वरभक्त्योश्च ऐक्यप्रतिपादनपरस्य, समष्टौ व्यष्टेः महिमाख्यानावधानदत्तचित्तस्य, शीलचारित्र्यरक्षणपूर्वकमानवताजयघोषकरस्य, लघुशरीरस्य खण्डकाव्यस्यास्य सर्वेभ्यश्चान्येभ्यः कियद् व्यतिरेकत्वम् अथ चोपयोगित्वमित्यत्रभवन्त एव प्रमाणम् ।

स्वामिविवेकानन्दो देशविदेशेषु भारतस्य यदाध्यात्मिकं स्वरूपं व्याचख्यौ तस्मिन् स्वरूपे भौतिकी समृद्धिरपि आवश्यकतया मणिकांचनसयोगवद् समुल्लसन्ती राराजते । निरपेक्षभौतिकसमृद्धिः आध्यात्मिकीच्छटा निरस्तपादपदेशे एरण्डछायेव श्रान्तक्लान्तमानवसौख्याय नालमिति धरित्र्याः वास्तविकत्वम् । वटच्छाया खलु आध्यात्मिकी चिन्ता, मुमूर्षुप्राणप्रदा च भौतिकसमृद्धिरियं-मन्दाकिनीधारा । द्वयोरप्यनयोः ईश्वरोन्मुखतया मानवताश्रेयस्कारितया च नास्ति द्वन्द्वः । भारतस्य दुरितदैन्यविद्रावणाय, अतीतगौरवप्राप्तये, विश्वबन्धुताप्रसाराय मानवताधर्महेतवे संन्यासितल्लजो विवेकानन्दः इदमेवावश्यकं प्राह, प्रसंगाच्च वासुदेवकृष्णस्य लोकातिक्रान्तगोचरं स्वरूपमपि व्याख्यातवान् । इदानीं निरन्तरस्वार्थविखण्डिते जगति स्वामिनोऽस्य सन्देशो लोकं नूनमुपकरिष्यतीतिधिया देववाण्यान् सिसृक्षामात्मनश्च मूर्तिमतीं दिदृक्षुः लघुकाव्यमेतत् क्रान्तदर्शिभ्यः सहृदयेभ्यो विनिवेद्य शुभाशीर्वचोभिर्भवतां सम्भावितात्मानं चात्मानमभिलषति कविरयम् ।

साहित्यायुर्वेदव्याकरणज्योतिषाद्यनेकविषयाचार्यैः तातचरणैः श्रीमत्-जगदम्बाप्रसादमिश्रमहाभागैः संस्काररूपेणोप्तम्, यशःशेषैः गुरुवर्यैः श्रीलक्ष्मीनारायणशास्त्रिमहाभागैः विद्यामन्दाकिनीसुधाधाराभिः सिञ्चितम्, अवशेषकीर्त्यया सहधर्मिण्या आचार्यया कुन्तीदेव्या चिरकांक्षितमप्यनवलोकितकुसुमम्, विधिवशादिदानीं परिणतफलं नूतनं "विवेकानन्दात्मकम्" काव्यमेतत् तेभ्य एव सश्रद्धं समर्प्य किञ्चित् प्राप्तानृण्यमिवात्मानं मन्यते कवयिता ।

काव्यमिदं मुद्रितरूपे समवलोकितुं प्रोत्साहयत्सु कविमित्रेषु दिल्ली-वास्तव्या महाकवयो डा० रमाकान्तशुक्लमहाभागा विशेषेण मम धन्यवादमर्हन्ति । विद्वत्समक्षं काव्यस्यास्य प्रस्तुतौ भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयो गुणग्राहिणः तदधिकारिणश्च वित्तीयसाहाय्यप्रदानेन यदुपाकुर्वन् तदर्थमयं कृतज्ञतां बिभर्ति । ये केचनान्ये सुहृदो हितैषिणो बान्धवाश्च प्रत्यक्षं परोक्षं वा स्नेहदानेन अनुजग्रहुः तेभ्यो धन्यवादं व्याहरत्येष तेषामन्यतमो बान्धवः ।

प्रूफसंशोधन-मुद्रणत्रुटिपरिशुद्धिकार्ये दत्तावधानतयापि क्वचित्क्वचित् तद्दर्शनेन सम्भाव्यमानं सुधियामायासं परिकल्प्य अन्यस्मिन् संस्करणे तन्निरासाय कृतसंकल्पो भगवन्तं चन्द्रमौलिं प्रार्थयन् विदुषामाशिषं च कामयमानो ग्रन्थास्यास्य प्रकाशकं विधुशेखरशास्त्रिणं शुभाशीर्वचोभिश्च समायोजयन् जल्पानादधिकात् विरमति —

●

सं० २०४६ दीपावल्याम्

विदुषामाश्रव :
शम्भुनाथ आचार्यः

५/३०, छक्कालाल स्ट्रीट
फर्रुखावाद

卐 श्री गणेशायनमः 卐

# "विवेकानन्दात्मकं"

## ( खण्डकाव्यम् )

शब्दार्थवत् [1] तोयतरङ्गवद्वा [2]
सङ्गीतगीतध्वनिवत्युतौ वा
प्रणम्य मातापितरौ जगत्याः
वितन्यते काव्यमुदीर्णसत्वम् ॥१॥

तदेव काव्यं रमणीयमिष्टं
निगद्यते यत् हरिकीर्तनाढ्यम् [3]
विशीर्यते तत्कविकर्म यत्र
स्यात्प्राकृतानां गुणगानमेव [4] ॥२॥

यत्प्राकृतानां गुणकीर्तनेन
दोषत्वमुक्तं कविवाङ्मयस्य
तपस्विनां चारु-चरित्र गानै—
र्निर्दोषतां तद्धि सदा प्रयाति ॥३॥

---

[1] तुल० शब्दार्थाविव सम्पृक्तौ, शब्दार्थ-प्रतिपत्तये । जगतः पितरौ वन्दे पार्वती परमेश्वरौ ॥ —रघुवंशः

[2] तुल० गिरा अरथ जलवीचि सम कहियत भिन्न न भिन्न —तुलसी रामचरितमानसम्

[3] तुल० तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि नामान्यनन्तस्य यशोंकितानि शृण्वन्तिगायन्ति गृणन्ति साधवः —श्रीमद्भागवतम्

[4] तुल० कीन्हें प्राकृतजन गुनगाना । सिरधुनि गिरा लगत पछिताना । —रामचरितमानसम्

भक्तस्य कस्यापि चरित्रगानात्
तच्छिक्षणस्यापि च कीर्तनाच्च
अधोक्षजस्यापि सुकीर्तनं स्यात्
भक्ते प्रभौ चाद्वयताभिधानात् ॥४॥

चारित्र्यनिर्माण–सुशिक्षया स्यात्
भक्तिः परा ब्रह्मणि जीवमूले
यत्साधनात् मानवतादिलाभो
लक्ष्यं हि यत् प्राणभृतां सदैव ॥५॥

इत्यर्थकामो मनसि प्रणुन्नः
कविर्महर्षे र्गुणशीलवृत्या
प्रयत्नमीषत्तनुते विवेका–
नन्दात्मकं काव्यमथाभिधातुम् ॥६॥

को नाम जानाति न भारतेस्मिन्
देशे विदेशेष्वपि वा जगत्याम्
तपः प्रपूतं यतिनं विवेका–
नन्दाख्यमुच्चैः श्रुतिसार विज्ञम् ॥७॥

यस्यप्रयासान्निखिलेपिलोके
नवावतारस्त्विव छान्दसोत्र
आध्यात्मिकः कोपि गुरुप्रसारो
अभूवन्न माधुर्यगुणावशिष्टः ॥८॥

मुनीन्द्रवर्यस्य च तस्य साधोः
लोकोद्धरार्थं निसृता च वाणी
आचारतां नीतवती प्रसन्ना
दारिद्र्यदैन्यादिनिवारिका स्यात् ॥९॥

बङ्गप्रदेशे मधुरे च रम्ये
बभूव कश्चिद् युवको वरेण्यः
व्युत्पन्नबुद्धिश्च वितर्कशीलो
नरेन्द्रनामा नवरीतिनीतिः ॥१०॥

प्रत्यक्षवादी मतिमान् विवेकी
पाश्चात्यवैचारिकताप्रधानः
विज्ञानविद्यार्थितयाग्र्यदृष्टिः
नास्तिक्यविश्वासयुतोमनस्वी ॥११॥

प्रमाणपुष्टैर्निजतर्कजालैः
प्रमाणयन्नैजमतं विशिष्टम्
आसीदयं वादिभयङ्करश्च
विद्योतमानो निजमित्रपंक्तौ ॥१२॥

यदीश्वरः कश्चिदिहास्ति नूनं
प्रत्यक्षमायाति न किं स लोके
अतीन्द्रिये वस्तुनि कः प्रतीयात्
परेशानाम्नीति च तद्विमर्शः ॥१३॥

श्री रामकृष्णाख्य-महर्षिपार्श्वे
विभिन्नभक्तैः सहितः कदाचित्
यदा कदा सोपि ययौ नरेन्द्रो
जिज्ञासुबुद्धिः प्रतिभावरेण्यः ॥१४॥

अज्ञातया प्रेरणया पुनः स
श्रृण्वन्मुने धार्मिकतत्ववादम्
ऐच्छन्मनस्येव तदावगन्तुं
प्रष्टुं न साक्षात् पृथुकः शशाक ॥१५॥

प्रचण्डवेगो गिरिनिर्झराणां
जलप्रवाहो गिरिणावरुद्धः
इवान्तरो भावचयस्तदीयः
शशाक न स्थातुमथ प्रयातुम् ॥१६॥

आभ्यन्तरेणेव च वाडवेन
भावातिरेकेण सरित्पतेश्च
विधूर्णितो भावजलौघ उच्चैस्
तस्याशु वेलामुखमापपात ॥१७॥

अथैकदा शान्तमृषिं प्रसन्नस्
तपोविभान्तं खलु रामकृष्णम्
उपेयिवान् प्रष्टुमसौ नरेन्द्रो
दुःसाहसीवात्र गुरुं सुशिष्यः ॥१८॥

दिव्यच्छटं योगनिधिं वरिष्ठं
तं नाधिगच्छन् परमार्थतः सः
निवृत्तये स्वस्य कुतूहलस्य
प्रोवाच बालोचितमेव वाक्यम् ॥१९॥

अपीश्वरः क्वापि विलोकितस्ते
शक्तोसि सन्दर्शयितुं च किं तम्
पृष्टो नरेन्द्रेण गुरुस्तमाह
नूनं च सद्यः कृतमन्दहास्यः ॥२०॥

इत्युत्तरं प्राप्य समिद्धभक्ति-
र्बालो नरेन्द्रः स्मितिभाषितं तम्
शक्तिप्रियं शक्तियुतं वरेण्यं
सन्दर्शनार्थं समयं ययाचे ॥२१॥

आर्तोहि जिज्ञासुरथो नरेन्द्र-
स्तेनोपदिष्टे समये प्रपेदे
गुरोः समीपं च तदाज्ञयासौ
स्नातुं गतस्तेन सहैव सिन्धौ ॥२२॥

निमज्जतस्तस्य जले महात्मा
निधाय हस्तं शिरसीव तस्थौ
अरुन्तुदां येन रुजं नरेन्द्रो
जलेनिमग्नत्वभिया ह्यवाप ॥२३॥

वारत्रयं चोग्रतपा मनस्वी
तेनैव रुपेण पुनः पुनः सः
निमज्जयामास तदा नरेन्द्रं
शिक्षाधिकारित्वपरीक्षणाय ॥२४॥

अन्तर्जलं श्वासगतेर्निरोधात्
मुमूर्षुपीडामति मन्यमानः
उन्मज्जितुं क्लिष्टतमान् प्रयत्नान्
कुर्वाण आसीदिव बालकोसौ ॥२५॥

दुःखार्वितं सातिशयं निरीक्ष्य
तं बालकं मृत्युभिया महात्मा
अपाचकर्षेति करं दयालु-
स्तत्शेखरात् शीघ्रतरं हि रामः ॥२६॥

करापकर्षाल्लघुभार एष
प्रत्युज्जगामाशु जलोपरिष्टात्
स्वास्थ्यं नु किंचित् समवाप्य तस्थौ
रोषात्प्रमुक्तस्त्विव राजमानः ॥२७॥

जलाद्बहिश्चागतमेव शिष्यं
पप्रच्छ रामः किमु रोदिषीति
किं चान्वभूस्तोयनिधौ निमग्नः
प्रब्रूहि मां शान्तधिया नरेन्द्र ॥२८॥

क्रुधा ज्वलन् विस्मितचित्तवृत्ति-
विवक्षुरुग्रं हि निमज्जयन्तम्
जलान्तरेसौ, समुवाच रामं
वेषे गुरोस्तं शमनं नरेन्द्रः ॥२९॥

त्वं मां ह्यनैषीः स्नपनाय चात्र
सन्दर्शनार्थं परमेशितु हि
मृत्योर्मुखं मामुपनेतुमेव
दृष्टो मया चैष तव प्रयासः ॥३०॥

रक्षाप्रयासेल्पविलम्बतोपि
ध्रुवो ममासीदिह मृत्युरेव
यद्व्याकुलत्वं हि मयान्वभावि
वाचां परं तत् हृदयैकगम्यम् ॥३१॥

दैन्यं च यत् यद्विवशत्वमत्र
तन्मुक्तिकामाय च यः प्रयासः
जिजीविषा—मृत्युयुधि प्रपन्ने—
नाद्यानुभूतं च कथं सुवाच्यम् ॥३२॥

समीक्षितुं त्वां गुरुभावतोऽत्र
क्षमो भवेयं कथमद्ययोगिन्
कृतान्तवत् शीघ्रतरं निपातुं
प्राणान्—ममासीः कृपणश्च यस्त्वम् ॥३३॥

निशम्य वाचः पृथुकस्य योगी
सम्भावनेच्छावशगः कृपालुः
प्रोवाच संशीतिविवृद्धमन्युं
बालं शनैः प्रीतियुतः शरण्यः ॥३४॥

यथान्वभूः क्लिष्टतमं महान्तं
त्वमार्तभावं हि रिरक्षिषेद्धः
तेनैव भावेन तथा परेशं
प्राप्तुं यतेथा र्यदि लप्स्यसे तम् ॥३५॥

विनाऽऽर्ततामुत्कटभक्तिभावं
व्याप्तोपि सर्वत्र सदास्त्यगम्यः
तच्छ्रद्धया प्रत्ययजुष्टयाऽसा-
वन्वेषणीयो हृदये प्रविष्टः ॥३६॥

"रिङ्गत्तरङ्गाः सरितो धरित्री
सुशाद्वला, चारुलताभिरामाः
अनोकहाश्चारु, हसन्ति नूनं
पुष्पाणि, नीहारयुता नगाश्च ॥३७॥

"सरित्तडागादितटे स्थितेषु
शाखाग्रहस्तैश्च समाह्वयत्सु
फलप्रसूनादिविलासवत्सु
खगा नदन्तस्तरुषु प्रसन्नाः ॥३८॥

"नीलाञ्जनाम्भोदघटेव नीला
दन्तावलीनामवलिः प्रसन्ना
कस्तूरिकामोदतया प्रसिद्धा
पलायमाना विविधाः कुरङ्गाः ॥३६॥

"गुहान्तरस्था अपि गर्जनेन
कम्पायमाना बहुवन्यजन्तून्
मृगाधिराजा हतसम्मुखस्था
विराजमाना निजविक्रमेण ॥४०॥

"आकाशतो भूमिमितीव यावत्
विभिन्नयोनिस्वपि दृश्यमानाः
जीवाः कदाचिन्नहि भेदभाव–
मर्हन्ति लोके न परात्मनस्तु ॥४१॥

"स्नेहेन जीवेषु परेण नित्यं
ह्यकृत्त्रिमेणेव च निर्विशेषम्
सर्वत्र वस्तुन्यपि तत्त्ववादात्
परेशबुद्धिः सुधिया विधेया" ॥४२॥

निधाय भूयः करपल्लवाग्रं
तन्मस्तके स्निग्धतया गुरोश्च
कारुण्ययुक्तस्य वचो निशम्य
पपात पादाम्बुरुहेषु बालः ॥४३॥

स्थिते गुरोः पादरजःसु तस्मिन्
पपात किञ्चिन्ननु तस्य तेजः
यदंशलाभेन परस्तपस्वी
यथा बभौ बालनरेन्द्र एषः ॥४४॥

ततः परं दिव्यशरीरिणासौ
तपस्विना तद्गुरुणानुशिष्टः
न्ययुङ्क्त चात्मानमतीव नम्रः
प्रपित्सयेशं निजसाधनायाम् ॥४५॥

श्रद्धानुगायाः खलु भक्तिधेनो—
र्विश्वासवत्सेन सुपूजितेन
पयः प्रदत्तं समवाप्य शिष्यो
बभौ नरेन्द्रा रवितुल्यतेजाः ॥४६॥

अनारतं दिव्यविभाप्तयेऽसौ
गुरुप्रणुन्नस्तपसे विशिष्टः
अवाप्य घोरात्तपसः सुतेजो—
हैयङ्गवीनं त्विव दुग्धराशेः ॥४७॥

आनन्दपश्चात् सुविवेकपूर्वं
गुरुप्रदत्तं समवाप्य नाम
परां प्रसिद्धिं लभते स्म लोके
युवा विचित्रः परमो हि साधुः ॥४८॥

आत्मांशसम्पातधियात्मशिष्ये
गुरौ तनुत्यागमिषात्प्रयाते
दिवं, विवेकः शुशुभे कृशोपि
पूज्या परा चन्द्रकलेव नूनम् ॥४९॥

वर्षाणि चाष्टादश सुप्रकृष्टं
तप्त्वा तपो दिव्यविभः परिव्राट्
ज्ञानप्रकाशै र्जनतान्धकारं
निर्णीतवान् दूरतरं विधातुम् ॥५०॥

विनम्रताचारपरायणोऽसौ
दैन्यं समीक्ष्यास्य च भारतस्य
पाश्चात्त्यदेशेषु विभूतिमत्त्वं
न विव्यथे किं मनसीति नेत्थम् ॥५१॥

दैन्येपि शान्तिं प्रधने क्षमां वा
बिचारणाचारुविलक्षबुद्धिः
आत्मोपलब्धिं गुणमाह साधु
र्बहिर्मुखत्वं जगतोत्र नूनम् ॥५२॥

शास्त्रीयशब्दावलिसम्परीतं
ध्यानैकसाध्यं ह्यनुभूतिगम्यम्
अद्वैतवादं सहि शङ्करोक्तं
व्याख्यातवान् लोकागिरा विशिष्टम् ॥५३॥

"दैन्यं परालम्बनमुच्चशिक्षाऽ
भावोऽनुकर्तृत्वमलीकगर्वः
पराङ्मुखत्वं निजधर्मवृत्तेः
कैङ्कर्यवृत्तिश्च कलापकर्षः ॥५४॥

"विलासिताम्भोधिनिमज्जनत्व–
मपथ्यरागत्वमुदग्रदम्भः
आडम्बरोल्लासितहृन्मनस्त्वं
विवेकमूढत्वमनर्थजल्पः ॥५५॥

"एतैः समस्तैर्भिलितैर्विवित्तैः
सम्मोहितं राष्ट्रमिदं समीक्ष्य
जाग्रद्विवेकश्च यती विवेको
जग्राह वाचं हि तदुद्धराय" ॥५६॥

न केवलं भारत एव राष्ट्रे
सुजागृतिश्चास्ति हि वाञ्छनीया
पाश्चात्त्यदेशेष्वपि तच्छविः स्यात्
प्रचारिता, तस्य विनिर्णयोऽभूत् ॥५७॥

इत्यात्मनीनेन विनिश्चयेन
दृढव्रतोऽसौ यतिनां वरिष्ठः
उद्बोधयन् देशजनान्, विदेशं
गन्तुं प्रतीक्षां समयस्यचक्रे ॥५८॥

कोलाम्बुदेशे बहुदेशवासैः
संयोज्यमानेऽखिलधर्मगोष्ठे
उपेक्षितः सन्नपि तत्र यातः
सम्प्रेरितोऽसौ खलु भारतीयैः ॥५९॥

स्वदेशधर्माचरणप्रसिद्धैः
स वावदूकै र्निजधर्मविद्भिः
संन्यासिवेशो न युवा कथंचित्
सम्मानितः साधुवचोभिरेव ॥६०॥

उपेक्षितश्चापि यती युवासौ
लेभे प्रवेशं निजवर्चसैव
स्फुलिङ्गमात्रं ज्वलनस्य कुत्र
क्षमेत नो दग्धुमिवेन्धनं हि ॥६१॥

प्रापुः परं विस्मयमेव सर्वे
विलोक्य संन्यस्तमिमं युवानम्
अदृष्टपूर्वो युवकोपि साधुः
दृष्टिं समेषां पुनराचकर्ष ॥६२॥

तेजस्विनं धीरतमं युवानं
प्रसन्नचिन्तं समभीक्ष्य सर्वे
सहस्ररश्मिं हि विलोक्य तारा
इवाबभुः क्षीणविभाः क्षणार्धम् ॥६३॥

सम्मेलनेस्मिन् विबुधाः प्रचण्डाः
स्वधर्ममेवाहुरिहोत्तमं वा
परान् सुधर्मानपि दोषदृष्ट्या
व्याचख्युरुर्जस्वितयात्र नूनम् ॥६४॥

विज्ञेषु सर्वेस्वपि तेषु दृष्ट्वा
परस्परस्पर्धितया विवृद्धम्
परावमानं च निजोत्तमत्वं
विसिस्मये चेतसि तत्र साधुः ॥६५॥

अयं च लब्ध्वावसरं यतीन्द्रश्—
चाल्पेषु शब्देषु च सूक्ष्मकाले
धर्मं विवेक्तुं मनसा विचिन्त्य
सम्बोधयामास हि तत्र सभ्यान् ॥६६॥

"हे भ्रातरः पूज्यतमा भगिन्यः
श्रेष्ठाः सभायामिह वर्तमानाः"
इत्येव सम्बोधनमात्रलुब्धा
रोमाञ्चिता मुग्धतयातिवेलम् ॥६७॥

तमभ्यनन्दन् यतिनं वरिष्ठं
विधाय हस्तध्वनिमुच्चकैस्ते
सगद्गदं साधुवचोभिरिष्टं
हर्षाश्रुसम्पूरितनेत्रकोणाः ॥६८॥

"मनस्विनो हे पुरुषा रमण्यो
ह्युपस्थिता" इत्यवधारितेन
सम्बोधनेनैव तदोच्यमाना
अश्रौषिसु र्नूतनशब्दराशिम् ॥६६॥

संश्रुत्य सम्बोधनमेतदीयं
हार्दं परं चारु मुदात्मनीनम्
व्यामोहमायु र्हिरणा हरिण्यो
यथा हि सङ्गीतलये नितान्तम् ॥७०॥

हर्षोद्गिरैः साधुतमै र्मनोज्ञै
र्हस्तोत्थितैर्वा ध्वनिभिः समेषाम्
विघ्नायितस्यास्य ऋषेः प्रवक्तुं
कालो व्यतीयाय बुधैः प्रदत्तः ॥७१॥

तथावगत्याशु महातपस्वी
सर्वान्तरात्मानमिवावकृष्य
रसं रविश्चारुकरैः पृथिव्याः
मञ्चं समाधिष्ठितवान् विनम्रः ॥७२॥

विनैव किञ्चिद् समुदीर्य सभ्यान्
सन्तिष्ठमानान् ब्रुवतो जनान् सः
अचीकथत् यत्समये व्यतीते
मम प्रदत्तेऽस्मि गृहीतमौनः ॥७३॥

मौनं तदानीं यतिनो हितेषां
सभासदां तापविवर्धकं किम्
उष्णांशुतप्तं सिकतातटं क्व
प्रयाति शान्तिं जलबिन्दुनात्र ॥७४॥

शुश्रूषवस्त्र समागतास्ते
जिज्ञासवो भारतधर्मनीतिम्
आजग्रहुश्चावसरं प्रदातुं
श्रीस्वामिने तत्प्रतिभाप्रभावात् ॥७५॥

तत्तेजसान्तःकरणे प्रधृष्टः
स्वयं पुनः सभ्यजनै र्यशस्वी
सम्प्रार्थितो भूरितयानुमेने
सभापतिश्चाग्रहमेव तेषाम् ॥७६॥

अपूर्वसम्बोधनदत्तहर्षं
योगीन्द्र, पीयूषवचोभिरस्मान्
आप्यायितान् पूर्णतया विधत्ता—
मनन्तपुण्योदयलब्धकीर्ते ॥७७॥

सभापतिप्रार्थनया स वाग्मी
प्रसन्नगम्भीरगिरा तदानीम्
अद्वैतभावोज्ज्वलया व्यधत्त
तान् मन्त्रमुग्धानिव तत्र लोकान् ॥७८॥

"परात्मनः सृष्टिरियं समस्ता
भिन्नापि सुस्थावरजङ्गमेति
उच्चावचस्थाननिपातभिन्ना-
प्यभिन्नवृत्तिः शशिनः सुधेव ॥७९॥

"भयङ्करा घोरतमा विलक्षाः
सुखप्रदाश्चारुतमाः प्रकाम्याः
जीवास्तरङ्गा इव भीमरूपाः
परात्मनस्तोयनिधे र्विचार्याः ॥८०॥

"मत्तद्विपादा च पिपीलिकं वा
रजोऽणुतः पर्वतमत्र यावत्
सच्चिद्घनानन्दमयस्य कान्ति-
र्विराजते ब्रह्मण एव नूनम् ॥८१॥

"यश्चापि भेदः परिलक्ष्यतेऽसौ
न तात्त्विकोऽज्ञानविजृम्भितात्मा
प्रकाशवृत्त्यापहृतेऽन्धकारे
रज्जु र्न सर्पभ्रममातनोति ॥८२॥

"न मन्दिरे वा गिरिजागृहे वा
न मस्जिदे चैकतया परेशः
बन्दीकृतस्तिष्ठति सर्वगोऽसा-
वणोरणीयान् महतो महीयान् ॥८३॥

"धनाढ्यता क्वापि दरिद्रता वा
कुलीनता चाप्यकुलीनता वा
दैवाश्रयत्वान्न विचारणीया
सदुद्यमः क्षेमकृते विधेयः ॥८४॥

"ईर्ष्याघृणाद्वेषविमत्सराद्या
यान् खेदयन्तीहि च ते पशुभ्यः
न भेदमर्हन्ति जनाः कदाचिद्
जितेन्द्रियाः स्यु र्जगतः शुभाय ॥८५॥

"सहस्ररश्मिर्हि निशाकरो वा
प्रकाशते, वाति समीर एषः
सर्वत्र निर्व्याजमथात्मशक्त्या
मनस्विनां क्वापि न भेदबुद्धिः ॥८६॥

"प्रीतिप्रधाने जगतीह शश्वत्
ज्ञानक्रियेच्छात्रितयेन युक्ते
नरोपि जीवान् हि जिघांसतीत्थं
योऽसौ कलङ्को मनुजन्मनीव ॥८७॥

"सद्यो हि रक्षोव्यवहार एष
त्याज्यो मनुष्यै र्गुणकर्मशीलैः
लोको मिथोऽयं परिवारबुद्ध्या
बन्धुः सदा चेति विचारणीयम् ॥८८॥

"विभिन्नभौगोलिककारणेभ्यो
विभिन्नरूपाकृतयोऽपि जीवाः
जगन्नियन्तुः परमेश्वरस्य
सुसन्ततित्वान्नहि पीडनीयाः ॥८६॥

"सामान्यजीवा अपि यत्र शास्त्रै
र्हिंस्याः कदाचिन्नहि यावदुक्ताः
विहिंसितुं मानवमेव कस्मात्
विचिन्तयेन्मानव एव तत्र ॥६०॥

"न मानवात् श्रेष्ठतरं हि किञ्चिद्
वाक्यं सदा चेतसि धारणीयम्
दुर्लभ्यमेतत् नरजीवनं हि
संलभ्य रक्षेदिह मानवत्वम् ॥६१॥

"जाग्रद्विवेकोऽपि जनो यदोच्चैः
पदं च संलभ्य पशुत्वबुद्धया
विनिन्दितं कर्म समाचरेत् यद्
तदेव शून्यं परिकल्पनीयम् ॥६२॥

"स्वधर्मकर्माचरणैः प्रशस्तै
र्निष्कण्टकं मानवतापथं ये
चक्रुः सदा तेऽपि विसृष्टदेहाः
प्रापु र्यशस्यं सुखदं च नाम" ॥६३॥

कोलाम्बुराष्ट्रे जनतां प्रबोध्य
विस्मापयन् धार्मिकवृद्धयूनः
ततश्चचालोग्रतया यशस्वी
समीपराष्ट्रेषु विबोधनाय ॥९४॥

यत्राप्यसौ धर्मगुरुः प्रयातः
करैर्निरस्यन्निबिडान्धकारम्
सहस्ररश्मिस्त्विव पूजितोऽभूत्
तत्रैव भावाकुलितै र्जनैश्च ॥९५॥

अथैकदा क्वापि महासभायां
प्रभाषमाणो मुनिरेष पृष्टः
गोप्योऽनुचेरुस्तु विहाय सर्वं
कृष्णं हि, संशीतिरपास्यतां नः ॥९६॥

वक्ष्ये हि तर्काश्रितमेव सर्वं
त्याज्यं न युष्माभिरपि स्वधैर्यम्
इति ब्रुवन् चारुगिरा प्रशान्तः
पस्पर्श तेषां हृदयानि सद्यः ॥९७॥

गङ्गाप्रवाहोपमितेन तत्र
हृद्ध्वान्तनिर्यासपरेण वाग्मी
मन्त्रेण बद्धानिव तान् प्रमुग्धान्
चकार भूयो निजभाषणेन ॥९८॥

तद्वाग्हृतान्तःकरणा विमुग्धाः
काष्ठाश्मपट्टोल्लिखिता इवासन्
निष्कम्पमाना मरुतापि दिव्या
रत्नप्रभाश्चातिशयं बभूवुः ॥९९॥

वचोभिरेतस्य मनःस्पृशद्भिः
कारुण्यपूर्णैरतिवेलमुच्चैः
रोमाञ्चिताः साश्रुसमीक्षणास्ते
तस्थु निमेषं खलु निर्निमेषाः ॥१००॥

समाधिमास्थाय परं भजन्तो
विलुप्तसांयोगिकवस्तुतत्त्वाः
अचिन्त्यभेदं ह्यपि भिन्नवृत्तिं
लब्ध्वा व्यराजन्त यतीन्द्रकल्पाः ॥१०१॥

तद्वाग्विलासैः सरसै र्विचित्रैः
सङ्गीतकस्येव लयैः स्वरै र्वा
मुग्धान्तरा गूढतरं प्रणुन्ना
विसस्मरुः स्वत्वमिव क्षणार्धम् ॥१०२॥

सम्मोहितानात्मवचोभिरेतान्
विमृश्य सर्वान् कृतनिश्चयोऽसौ
सञ्चात् शनैः पृष्ठतरं प्रयातुं
बबन्ध बुद्धिं यतवाक् कृपालुः ॥१०३॥

धाराप्रवाहं ह्यभिभाषमाणस्
ततः स मञ्चादवतारमेव
शनैः शनैस् तज्जनतासमक्ष—
मस्ताचलात् सूर्य इव प्रपेदे ॥१०४॥

मञ्चादधस्तादवतीर्य साधुश्
चचाल पृष्ठादभिलक्ष्य बाह्यम्
सुधानिपानोद्यतचातकीव
तं चान्वगच्छद् जनता सुधांशुम् ॥१०५॥

तद्वक्तृतामुग्धतया समस्ताः
श्रोतार ईशद्युतिभासमानम्
अनुप्रयान्तोऽपि न चावजग्मुः
क्व ते कुतो वाथ कथं प्रपन्नाः ॥१०६॥

मन्दक्रमश्चित्तमनन्तशक्त्या
निर्बन्ध्य तेषां समुपस्थितानाम्
गवां व्रजं रज्जुभिरुग्रतेजा
बहिर्जगामेति वचोभिरेषः ॥१०७॥

निरभ्रमाकाशतलं सभाया
निनाय दूरं ह्यवशान् स सभ्यान्
आविष्टचित्ता इव ते बभूवुस्
तदाननासक्तदृशस्तदानीम् ॥१०८॥

समाधिलग्नानिव योगिनस्तान्
आत्मानुगन्तॄन् हि सभां विहाय
पप्रच्छ सभ्यान् स वशी जितात्मा
किमाययु र्मां परितो भवन्तः ॥१०९॥

ते पृच्छ्यमाना अपि नावजग्मुः
किमाह योगी क्षणमात्रमेव
आस्वादितानेकरसाश्च मूका
इव व्यलोक्यन्त कथाविमूढाः ॥११०॥

शुश्रूषवस्ते हि ददृक्षवस्तं
तदात्मनोऽद्वैतविदस्तदानीम्
चकाशिरे सिन्धुजलादभिन्ना
रिङ्गत्तरङ्गा इव नित्यमारात् ॥१११॥

सभासदस्तान् कमलायताक्षो
वाग्मी विमुग्धानवलोक्य साधुः
स विस्मिताक्षो हृदि मोदमानः
सस्मार शक्तिं हि विभो र्गुरोश्च ॥११२॥

लब्धप्रसादः परमेश्वरस्य
रामाभिधानस्य गुरोश्च भूयः
प्रत्यायनार्थं वसुदेवशक्तेस्
तानभ्यधात् पुण्यगिरो महर्षिः ॥११३॥

हे भ्रातरो मामनु रे भगिन्यो
यूयं समागच्छथ चात्र सर्वे
स्थलं सभायाः परिहाय कस्माद्
विलुप्तचित्ता इव विप्रलब्धाः ॥११४॥

अकिञ्चनोऽहं क्व यती, क्व यूयं
तिरस्कृतस्वर्गविभूतयश्च
आकर्षणं किं समभीक्ष्य भूयो
मामन्वयासिष्ट गृहान् विहाय ॥११५॥

यात प्रयातात्मगृहान् वियुक्तान्
सम्भावयेत प्रतिसद्म सर्वे
स्वप्नादिवोत्थाय नवीनशक्त्या
भवेत नित्यव्यवहारदक्षाः ॥११६॥

पश्यत्स्वपश्यन्निव कश्चिदत्र
शृण्वत्स्वशृण्वन्निव मद्वचांसि
उपेक्षतां चेद्यदि साधुवृत्ति-
र्युष्मासु, कश्चात्र मदीयदोषः ॥११७॥

तारस्वरैश्चारुनिनादिताया
विपञ्चिकायास्त्रुटितेन तन्त्याः
इव स्वरे मौनमिते मुनीन्द्रे
तस्मिन् बभौ स्तब्ध इवैष लोकः ॥११८॥

मौनेन रुद्धैरिह तद्वचोभि
विद्युत्तरङ्गैरिव भग्नमेषाम्
ध्यानं हि सद्यः समुपस्थितानाम्-
मुत्सृज्य मञ्चं बहिरागतानाम् ॥११९॥

प्रत्येकमाहुः समभीक्ष्य सर्वे
बहिःस्थितानात्मन एव तत्र
त्वद्वाक्सुधास्यन्दिमरीचिगौर-
चन्द्रप्रभाकृष्टतयेव याताः ॥१२०॥

हृतेन्द्रिया वस्तुचयैरिवात्र
गुरूपदेशैरिव बद्धभावाः
अलोकसामान्यविलोकनीय-
प्रभाप्रकर्षैस्तव विप्रलब्धाः ॥१२१॥

विसृज्य चास्थानकमत्र सर्वे
वयं कथं ते ह्यनुयायिनः स्मः
यत्नं विधायापि कठोरमेव
ज्ञातुं समर्था न कदाप्यभूम ॥१२२॥

मनोहराश्चारुतरास्त्वदीया
वाचो मनःस्थानमुपेत्य शीघ्रम्
कृत्वाधिकारं हि समानयन्नः
प्राणान् शरीरादिव मानवीयात् ॥१२३॥

संश्रुत्य भावप्रवणानि तेषां
वचांसि कुन्दस्मितिशोभमानः
प्रबोधयन् श्रोतृगणान् विवेकः
स प्रत्यवोचद् घनसान्द्रवाचा ॥१२४॥

"सामान्यजीवस्य ममाभिवाचो
यूयं समाकर्ण्य हृदाभिशून्याः
इहागता यद्धि किमत्र चित्र–
मन्वाययुः कृष्णमिमं हि गोप्यः ॥१२५॥

"न केवलं गोपसुतः स कृष्णः
समस्तलोकप्रभवो महौजाः
अवातरन् मानवदेह एष
प्रभुर्विचित्राभरणः कृपालुः ॥१२६॥

"दुष्टान् विनेतुं परिरक्षणार्थं
सतां स धर्मोद्धरणाय नूनम्
ब्रजान्तरिक्षे ह्युदियाय सूर्यस्
तमोनिरस्यन्निव रश्मिजालैः ॥१२७॥

"यो निर्गुणो योगिभिरप्यगम्यः
समाधिनिष्ठैरपि सर्वगोऽयम्
रिरंसया सोऽत्र घनश्चिदात्मा
ब्रजे चकाशे नभसीव चन्द्रः ॥१२८॥

"नीलद्युति र्मेचकविग्रहोऽसौ
पीताम्बरश्चातकतृप्तिकारी
सौदामिनीश्लेषविशिष्टकान्ति-
र्विराजते कोऽपि विचित्रमेघः ॥१२९॥

"वेदान्तिभि र्ब्रह्म शिवस्तु शैवै
र्नैयायिकैः कर्तृतया प्रपन्नः
मीमांसकैः कर्म निरूपितं यत्
तदेव कृष्णो वसुदेवसूनुः ॥१३०॥

"सान्तोऽप्यनन्तः सुलभोऽप्यलभ्यो
दृश्योऽप्यदृश्यः सगुणोऽप्यगुण्यः
वनौकसां गेहवतामजस्रं
स निर्विशेषं भुवि कामनीयः ॥१३१॥

"सौन्दर्यसिन्धुं भुवि चात्र मातुं
क्षमेत को, यस्य विलुप्तदर्पः
पुत्रत्वमाप्नोन्नयनाभिरामः
कामः स्वयं लोकसमृद्धिहेतोः ॥१३२॥

"वृन्दारकैरीड्यतमस्य तस्य
शोभाम्बुधेः सृष्टिगुरो र्हि येन
नालक्ष्मि सौन्दर्यकृपाकटाक्षो
निरर्थकं जीवनमेव तस्य ॥१३३॥

"जिज्ञासुभि र्ज्ञानिभिरीश्वरोऽयं
मर्थार्थिभिश्चार्ततमै र्हि भक्तैः
प्रयोजनावाप्तिहिताय सर्वै-
रभ्यर्हणीयोऽस्ति सदैव पूज्यः ॥१३४॥

"स किल्बिषघ्नः श्रुतिभि र्विगीतो
भक्त्या स्मृतस्तत्क्षणमेव तुष्टः
वैकुण्ठलब्धं च सुखं विहाय
त्रातुं समागच्छति निर्विकारः ॥१३५॥

"बर्हावतंसः कुटिलालकस्तु
नीपश्रितो लाकृतिरंशुदीप्तः
वंशीस्वराकृष्टसमस्तलोक-
चक्षुःफलं नेत्रवतामिवास्ते ॥१३६॥

विभावनीयो हृदयेन कृष्णश्
चोत्कर्षलाभाय विना प्रपञ्चम्"
उपस्थितांस्तान् सहसा निरुच्य
जग्राह मौनं यतिनां वरिष्ठः ॥१३७॥

श्रद्धाभिभूताः सकला जनास्ते
तं योगिवर्यं सहसा प्रणेमुः
ययाचिरे तं यमिनं प्रपन्नाः
शुभाशिषं कृष्णमिवाभिमत्य ॥१३८॥

धर्मधुरीणतया स यतीशो
देशविदेशजनानुपलभ्य
भारतभूमिसुचिन्तितधर्मं
साधुतया प्रथितं हि चकार ॥१३६॥

"यत्र यत्र भजनं जगत्पते
र्यत्र यत्र शुभकीर्तनं हरेः
कष्टबिन्दुरपि तत्र-तत्र नो
यत्र-यत्र सुमतिर्महात्मनाम् ॥१४०॥

"क्षालितं हि बहुधापि बाह्यतो
दोषसम्भृतमथास्ति चान्तरम्
यस्य, तस्य पठितं च भाषितं
व्यर्थमेव सकलं विभाव्यते ॥१४१॥

"आत्मनो बलमवाप्य यः क्वचित्
श्रेयसे भवति यत्नवान् जनः
तस्य सिद्धिरुपयाति योगिनः
शान्तदान्तमनसस्त्ववात्र रे ॥१४२॥

"कोऽत्र कस्य सहजः सखात्र रे
कस्य चात्र हृदयं सुनिर्मलम्
प्रेम्णि कस्य जगतीह केनचित्
जीवनं निजमुपेक्ष्य चार्पितम् ॥१४३॥

"वञ्चनं हि जगतां स्वभावता–
मागतं सकलजीवनेष्वहो
सर्व एव भुजगा इवान्तरे
पालयन्ति विषमुल्वणं परम् ॥१४४॥

"दुर्जनास्तु यतिवेषधारिणस्
त्यक्तसर्वजगतोपि मानिनः
स्वर्णधामरुचयो निरन्तरं
राजनीतिपशुतामुपागताः ॥१४५॥

"निर्मलं भवति यस्य मानसं
प्रीतिमांश्च निखिलेषु यः सदा
यस्य वैरमिह नैव केषुचित्
तादृशस्तु विरलो जनो भुवि ॥१४६॥

"वैरभावमपहाय मानवो
मानवस्य भवतात् प्रियंकरः
प्राप्नुयाच्च नियतं महद्यशो
मानवत्वसुखसाधने रतः ॥१४७॥

"सर्वश्च सर्वैरपि चास्ति वेद्यो
दुःखं सुखं चापि समानमेव
कश्चित्पुरः कोऽपि सुखं च दुःखं
पश्चादवाप्नोति विना वितर्कम् ॥१४८॥

"अल्पप्रयासादपि कस्य कार्यं
सिद्धिं ह्यवाप्नोति विना प्रयत्नात्
कृतेषु यत्नेष्वपि कस्यचिद्वै
सिद्धिं दुरापा भवतीह लोके ॥१४६॥

"लब्ध्वाप्यसिद्धिं न न साहसी स्यात्
नाहंकृतिं यातु सुखेन कश्चित्
एतद्द्वयं साधु समानमेव
मत्वा जनश्चात्र जिजीविषेद्धि ॥१५०॥

"दुःखातिमूढश्च सुखाभिमानी
द्वावप्यमू कष्टचयं भजेते
अतिद्वयः कोपि विवेकशीलः
प्रमोदतेऽस्मिन्निखिलेऽपि लोके ॥१५१॥

"अस्मच्छरीरात् नहि कस्य कष्टं
शारीरिकं मानसिकं भवेद्वा
इत्येव मत्वा खलु यस्य कार्यं
लोकोपकृत्यै स हि विश्वपूज्यः ॥१५२॥

"इदं मदीयं परकीयमेतत्
गृह्णाम्यहं चैव ददामि किंचित्
नैतद्विचिन्त्यं, नहि कोपि दाता
तथा ग्रहीता, न निजः परोवा ॥१५३॥

"यत्स्वं जगत्यां न बिभिद्यते तत्
बिभिद्यते यच्च न तत्स्वकं वै
राराजते स्वात्मविलास एव
न भेदबुद्धि विबुधेन कार्या ॥१५४॥

"यथेन्द्रियार्थेषु जनस्य चेतो
ह्यमन्दमानन्दमवाप्य तुष्टम्
तथैव चेदात्मनि तत् रमेत
सुखस्य सीमैव न तस्य काचित् ॥१५५॥

"तत्त्वं च तथ्यं यदपीह सत्यं
ह्यनश्वरं किञ्चिदिवोग्रतेजः
तदात्मरूपं सुधिया विभाव्यं
भिन्नं न तस्मादपि किंचिदत्र ॥१५६॥

"यच्चास्म्यहं तत्त्वमसीह, यत्त्वं
तच्चास्म्यहं, चैकमिवेह सर्वम्
अभेदबुद्धिस्तरतीत्यवश्यं
भुंक्ते सुखं चापि स एव भूम्नः ॥१५७॥

"यो वा समाहृत्य निजेन्द्रियाणि
परावरे ब्रह्मणि निष्ठयास्ते
स युक्तयोगी परमार्थतत्त्वा-
दैक्येन नित्यं रमते स्वधाम्नि ॥१५८॥

"न किन्तु सर्वैरपि योगिभि र्वा
भाव्यं जगत्यत्र विसृष्टसर्वैः
यतः प्रसूता परमेश्वरेण
वयं विशिष्टाय च हेतवेऽत्र ॥१५९॥

"वसुन्धरेयं विततता विशाला
शस्यादिभिः कन्दफलादिभिश्च
मातेव या रक्षति नः सदैव
न तत्कृते किं करणीयमस्ति ॥१६०॥

"आहारनिद्राभयमैथुनानि
तप्तुं तपो वा विपिनेषु यानम्
विरक्तिभावो जगतीतिमात्रं
न मानवानां जनिलक्ष्यमस्ति ॥१६१॥

"चरन् सदाचारमतीव धर्म्यं
तप्त्वात्मिकं चापि तपः पवित्रम्
देशस्य राष्ट्रस्य ऋणाद् विमुक्ति
यतेत लब्धुं प्रभुसानुरागः ॥१६२॥

"दीनान् विपन्नान् दुरिताभियुक्तान्
श्रृङ्गारचेष्टानथ सर्वकाले
नास्तिक्यबुद्धीनपि सद्वचोभिः
प्रवर्तयेत् साहसकर्मणीह ॥१६३॥

"उदीर्य गाथा निजपूर्वजानां
धर्माय राष्ट्राय तनुत्यजां वै
उद्बोधयेयु निजधर्मराष्ट्र-
श्रद्धां पवित्रां हृदयेषु तेषाम् ॥१६४॥

"दर्पस्तु लोके सुधियामपीह
धनान्धकारस्त्विव बुद्धिमीक्षाम्
विलिम्पतीह क्षणमात्रमेव
विवेकशीला भवत प्रसन्नाः ॥१६५॥

"यः सेवते स्वार्थवशादविज्ञं
नूनं स शाखोटकवृक्षसेवी
सिन्धूर्मिसंख्यागणनेन कोऽत्र
रत्नान्यमूल्यानि कदा ह्यवाप ॥१६६॥

"शास्त्रेष्वधीती ह्यपि नैजयत्नात्
विना गुरुं नैव चकास्ति लोके
अशाणलीढः क्व मणि र्नृपाणां
शिरोविभूषात्वमुपैति चात्र ॥१६७॥

"कृशोऽपि धीमान् विबुधः प्रशान्तः
पूजां सदा संलभते मनस्वी
कदा मृगाङ्कः सकलङ्क एष
न पूर्णिमायां वद पूज्यतेऽत्र ॥१६८॥

"ददाति यो लोकहिताय सर्वं
क्षीणोऽप्यसौ वन्द्यतमो जनानाम्
कलावशेषो हि निरन्तरश्रीः
संधार्यते मूर्ध्नि शशी शिवेन ॥१६९॥

"त्याज्यं न चारित्र्यमथोज्ज्वलं रे
रत्नं हि तत् श्लाघ्यतमं तपश्च
समस्तविश्वभ्रमणाप्तखेदात्
विसृज्यते नो तपनेन तापः ॥१७०॥

"वंशक्रमाद् धर्मवशाच्च लब्धं
विहाय राज्यं विपिनं प्रयातः
ररक्ष शीलं रघुपुङ्गवो हि
महात्मनां शीलमिवास्ति धर्मः ॥१७१॥

दुःखान्यसह्यानि पराणि सोढ्वा
धर्मात्मजो नो विचचाल शीलात्
महौजसां धर्मपरायणानां
चकास्ति शीलं परमप्रकर्षात् ॥१७२॥

"उच्चैस्तमं यन्नलिकाश्रयेण
नेनीयतेऽम्बु प्रतिवारमेव
पतत्यधस्तच्च विना प्रयासात्
अचेतनं चापि हि शीलनिघ्नम् ॥१७३॥

"लताप्रतानग्रथितां विशाला
दृषद्हताश्चापि महीरुहा यत्
छायाप्रदाः पुष्पफलप्रदाश्च
निदर्शनं तत्खलु साधुतायाः ॥१७४॥

"दुःखान्न दैन्यं न पलायनं वा
संघर्षमास्थाय च तस्य नाशम्
"जिजीविषन्तीह विधाय वीराः
शौर्योद्धतानामयमेव धर्मः ॥१७५॥

"आध्यात्मिकगौरवगाथायाः
केवलशंखनिनादनतो नहि
राष्ट्रं क्वापि पदं लभते खलु
तेन भौतिकी सिद्धिः काम्या" ॥१७६॥

दैन्यकलङ्कितभारतभूमि-
समुद्धरणाय विशेषतयासौ
नव्यपुरातनमेलनमेव
जगाद मतं मुनिरत्र विशिष्टम् ॥१७७॥

मानवतायाः सेवाकार्ये
विश्वबन्धुताचिरसंचारे
ईशभक्तिमिव मन्वानः खलु
जीवनचर्यां निजां व्यतानीत् ॥१७८॥

इति विवेकानन्दात्मकं काव्यं सम्पूर्णम्

**लेखकस्य प्रकाश्याः संस्कृतग्रन्थाः**

१- स्तोत्रसाहस्री
२- राष्ट्रिय गीताञ्जलिः
३- काव्यकुसुमाञ्जलिः
४- राधामाधवीयं काव्यम्
५- कालिदासीयं खण्डकाव्यम्
६- पाकिस्तानौद्धत्यं काव्यम्
८- स्फुटपद्यसंग्रहः
९- द्रोणात्मकथ्यं प्रबन्धकाव्यम्
१०- नव्यगीतिकलिका
११- शोकगीतिका (Elegy)
१२- रुक्मिणीमानहरणं काव्यम्
१३- लोहित-शुक्ल-कृष्णा
(उ० प्र० संस्कृत अकादमी पुरस्कृत-आकाशवाणीप्रसारित कथानां संग्रहः)
१४- तुलनात्मकं काव्यशास्त्रम् (काव्यशास्त्रीयो ग्रन्थः)
१५- नवलकथा (अनूदित कथानां संकलनम्)
१६- समीक्षावृन्तम् (समीक्षात्मक निबन्ध संग्रहः)

मुद्रक :—
संध्या प्रिंटिंग प्रेस, बागकूँचा, फर्रुखाबाद ।